# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीय परीक्षा

Aug-2008 (1)

### प्रथमपत्रिका

दिनाङ्कः – ३१-८-२००८ | अङ्काः–१००
पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् | समयः–घण्टात्रयम्

**1 एकवाक्येन संस्कृतभाषया उत्तरं लिखत । ( अष्टानामेव)** 8

१. भोजस्य कस्मिन् महानादरः आसीत् ?
२. विक्रमः फलं कस्मै प्रायच्छत् ?
३. कः भषतः शुनकस्य मुखे सप्तशरान् मुमोच ?
४. धर्मव्याधः कुत्र न्यवसत् ?
५. श्री शङ्कराचार्यः कस्मात् संन्यासदीक्षां प्राप्तवान् ?
६. पितामहः आत्मानं कथं दर्शितवान् ?
७. पञ्चतन्त्रस्य कर्ता कः ?
८. तारकेण विप्रकृताः देवाः कुत्र ययुः ?
९. वाग्देवता कुत्र वसतु ?
१०. मल्लस्य नाम किम् ?

**2 द्वित्रैः वाक्यैः संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 10

१. विष्णुः कथं वर्णितः ?
२. रामशुकस्य वचनम् आकर्ण्य विप्रः किमपृच्छत् ?
३. कौशिकः कीदृशः द्विजः आसीत् ?
४. नयशास्त्रकर्तारः के ?
५. हनूमान् समुद्रस्योपरि किं किं चकार ?
६. व्याधः कथमासीत् ?

**3 त्रयाणां संस्कृतभाषया उत्तर लिखत।** 9

१. भुजङ्गमः रोषात् किमकरोत् ? तस्य परिणामः कः ?



पश्चादनुवर्तते

२. हनूमान् सीतां कथं आश्वासयामास ?

३. चित्रग्रीवः कः ? सः स्वाश्रितान् कथम् अरक्षत् ?

४. श्री शङ्कराचार्याः कुत्र कुत्र मठान् स्थापितवान्तः ? कुतः ?

**4 त्रयाणां कर्णाटकभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।** 12

१ भोजराजस्य समस्या केन पूरिता ? कथम् ?

२. आहारशुद्धौ सत्वशुद्धिः इति वाक्यं पाठरीत्या विशदयत ।

३. सर्वे देवाः चतुर्मुखब्रह्माणं कथं अस्तुवन् ?

४. कृतमुपकारं के न विस्मरन्ति ? किमर्थम् ?

**5 चतुर्णां ससन्दर्भं संस्कृतभाषया कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।** 12

१. राजन् ! पूरिता मया समस्या ।

२. जरामरणवर्जितो वज्रकायो भविष्यति ।

३. मनुष्याणां शरीरस्थो रिपुः क्रोधः ।

४. तदनन्तरं यद्भावि तद्भवतु ।

५. सर्वथा अविचारितं कर्म न कर्तव्यम् ।

**6 द्वयोःअन्वयानुसारम् अर्थं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत ।** 4

१. रावणस्तु तदाऽभ्येत्य मैथिलीं मदनर्दितः ।
भार्या भव ममेत्येवं बहुधा समयाचत ।।

२. यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ।।

३. जालमादाय गच्छन्ति संहताः पक्षिणोऽप्यमी ।
यदा तु विवदिष्यन्ति वशमेष्यन्ति मे तदा ।

**7 श्लोकद्वयं पूरयत ।** 4

१. आद्यायामिततेजसे ................................ शम्भवे ।।

२. प्रत्यहं प्रत्यवेक्षेत ...................................... सत्पुरुषैरिति ।।

३. जयन्ति ते सुकृतिनो ....................................... भयम् ।।

**8 कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** 5

एकदा द्रोणस्य आज्ञया कौरवपाण्डवाः मृगयां कर्तुं वनमगच्छन् । तेषु मृगयां कुर्वत्सु कश्चित् सारमेयः अपरिचितम् एकलव्यं दृष्ट्वा अभषत् । अनुपदमेव स भषतः शुनकस्य मुखे सप्तशरान् अपूरयत् । स श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत् । स तु तं विलोक्य विस्मितः तम् अन्विष्यन् भ्रातृभिः सह आगत्य, अविरतं शरान् प्रयुञ्जानम् एकलव्यम् अपश्यत् ।

**9 रिक्तस्थानं पूरयत ।** 3

१. ...................... ददौ तस्य करे सा मारुतेः प्रियम् ।

२. अतिथिभ्योऽपि तव पतिरेव ...................... मन्यसे ।

३. मनुष्याणां ............................ महान् रिपुः ।।

**10 पर्याय पदानि लिखत । (त्रयाणामेव)** 3

१. सारमेयः २. ब्रह्मा ३. क्षीरम् ४. सर्पः

**11 विरुद्धार्थकपदं लिखत (त्रयाणामेव)।** 3

१. शुभम् २. दिवा ३.हितः ४. रिपुः

**12 वाक्यं रचयत । (त्रयाणामेव)** 3

१. आसीत् २. नमः ३. बहिः ४. मम

**13 सर्वपुरुषवचनेषु लिखत । (एकस्य)** 3

१. अयाचत २. अभूत् ३. आसीत्

**14 सन्धिं विभज्य नाम लिखत । (त्रयाणामेव)** 3

१. तल्लयः २. लक्ष्मीरेषा ३. अथैकस्मिन् ४. अर्हन्निति

15 **लोकोक्तिद्वयं पूरयित्वा कर्णाटकभाषया आङ्ग्लभाषया वा अर्थं विवृणुत।** 4

१. प्रक्षालनाद्धि ........................ वरम् ।

२. चक्र ................................ पङ्क्तिः ।

16 **व्याकरणविशेषं लिखत । (द्वयोरेव)** 3

१. कपोतराजः २. मात्रा सह ३. करोति स्म

17 **प्रयोगपरिवर्तनं कुरुत ।** 2

१. तेन पूजा न कृता २. मालया कार्यं क्रियते ।

18 **वाक्यदोषं परिहरत ।** 3

१. रामस्य सह सीतापि वनमगच्छत् ।

२. सज्जनाः परोपकारं करोति ।

३. भवान् मन्दिरं गच्छ ।

19 **कर्तृ-कर्म-क्रियापदानि सूचयत ।** 2

१. वयं क्षीरं पिबामः ।

२. अहं संस्कृताध्ययनं करोमि ।

20 **समूहेतरपदं चिनुत ।** 3

| | | | | |
|---|---|---|---|---|
| १. | मुनिरिति, | गौरियम्, | धेनुर्गच्छति, | नरोऽसौ |
| २. | सह, | सार्धं, | समम्, | सः |
| ३. | गतवती, | कृतवती, | भवती, | ज्ञानवती |

★ ★ ★ ★ ★

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

Aug-2008 (2)

### द्वितीयपत्रिका

दिनाङ्कः - ३१-८-२००८ अङ्काः-५०

अपराह्णे - १-३० तः ३-०० पर्यन्तम् समयः-सार्धैकहोरा

1 **दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत ।** 5

१. गङ्गानदी २. गणकयन्त्रम् ३. दीपावली

2 **संस्कृतभाषया पत्रमेकं लिखत ।** 5

१. दीपावलीनिमित्तं शुभाशयं प्रकटयन् मित्राय पत्रमेकं लिखत ।

२. पुस्तकक्रीणनार्थं धनप्रेषणाय पितरं प्रति पत्रमेकं लिखत ।

3 **स्वोत्तरभाषया सलक्षणं विवृणुत । (द्वावेव)** 6

१. शतृ प्रत्ययः २. विशेषणानि ३. उपसर्गाः

4 **वाक्यदोषान् परिहरत ।** 4

१. गृहेण पिता आगच्छति । २. रमेशः चित्रं विलिखित्वा शेते ।

३. राधा मातुः सह मन्दिरं गच्छति ।

5 **द्वयोः रूपाणि पुरुषत्रये लिखत ।** 6

१. गमिष्यति २. भवतु ३. अब्रवीत्

6 **शब्दमेकं सर्वविभक्तिवचनेषु लिखत ।** 4

१. एतद् (पुं) २. पितृ ३. राजन्

7 **प्रयोगपरिवर्तनं कुरुत । (त्रयाणामेव)** 3

१. तेन पूजा न कृता ।

२. नाहं विद्याविक्रयं करोमि ।



पश्चादनुवर्तते

३. मात्रा महानसे अन्नं अपच्यत ।
४. पिता मन्दिरं गच्छति ।

8 **वाक्यमेकं आङ्ग्लभाषया कर्णाटकभाषया वा विवृणुत ।** 2

१. यथा राजा तथा प्रजाः २. गतं न चिन्तयेत् प्राज्ञः

9 **त्रयाणां अन्यलिङ्गरूपणि लिखत ।** 3

१. धृतवान् २. अस्याः ३. गच्छन् ४.देवी

10 **एकस्य व्याकरणविशेषं लिखत ।** 2

१. गुरुभ्यो नमः २. अग्नये स्वाहा ३. गच्छति स्म

11 **कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** 5

पुरा तेनालीरामो नाम कश्चन सुधीः अभूत् । केऽपि तस्कराः निशायां तद्गृहं प्रविश्य कुत्रापि रहसि स्थिताः । तज्ज्ञात्वा स बुधः सर्वं भूगृहे निगूह्य भार्याम् उच्चैः अवोचत् ''प्रिये, चोरभयमेषु दिनेषु बहुधा श्रूयते । अतः धनं पेटिकायां निवेश्यताम् । कूपे निक्षिपावः'' इति । सा भर्तुः हृदयं विज्ञाय 'बाडम्' इत्याह ।

12 **संस्कृतभाषया अनुवादं कुरत ।** 5

ಗ್ರಾಮವೊಂದರಲ್ಲಿ ಭದ್ರ ಎಂಬ ಹೆಸರಿನ ಸೇವಕನಿದ್ದನು. ಅತ ಒಂದು ಕಪಿಯನ್ನು ಹಾಗೂ ಒಂದು ಆಡನ್ನು ಬಹು ಕಷ್ಟದಿಂದ ಬೆಳಸುತ್ತಿದ್ದನು. ಒಮ್ಮೆ ಅತನು ಅನ್ಯ ಗ್ರಾಮಕ್ಕೆ ಹೋದನು. ತನ್ನೊಂದಿಗೆ ಮಧ್ಯಾಹ್ನದ ಭೋಜನಕ್ಕಾಗಿ ಮೊಸರನ್ನವನ್ನು ಒಯ್ದನು. ಮಾರ್ಗದಲ್ಲಿ ಒಂದು ಸರೋವರವನ್ನು ಕಂಡನು.

In a certain village there was a servent called Bhadra. He was rearing up a monkey and a goat with great difficulty. Once, he had to go to another village. He carried with him curdrice for his lunch. On the way, he came across a lake.

* * * * *